International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 67-69
© 2022 IJSR
www.anantaajournal.com
Received: 22-10-2021
Accepted: 08-12-2021

**सागरिका पण्ड़ा**
शोधच्छात्रा, संस्कृतविभागः, महाराजा श्रीरामचन्द्र भञ्जदेओ विश्वविद्यालयः, द्वितीयपरिसरः, केन्दुझरम्, ओडिशा, भारत

**Corresponding Author:**
**सागरिका पण्ड़ा**
शोधच्छात्रा, संस्कृतविभागः, महाराजा श्रीरामचन्द्र भञ्जदेओ विश्वविद्यालयः, द्वितीयपरिसरः, केन्दुझरम्, ओडिशा, भारत

# रमानाथमिश्रकृतचाणक्यविजयनाटके पञ्च-अर्थप्रकृतयः

**सागरिका पण्ड़ा**

**उपोद्घातः-**
उत्कलप्रदेशस्य सारस्वतपीठं तथा संस्कृतसाहित्यस्य श्रीक्षेत्रं भवति बालेश्वरम् । विभिन्नदेवालयानां सांस्कृतिकपीठानाञ्च भित्तिभूमिषु विद्यमानानां शिलालेखानां समीक्षणेन प्राचीनकालादारभ्य एयावत् बालेश्वरमण्डलस्य चर्च्चा आसीदिति सर्वैः ज्ञायते। वैदिकयुगादारभ्य आधुनिकयुगपर्यन्तं संस्कृतसाहित्यं प्रति बालेश्वरस्य अवदानं अविस्मरणीयम् । एतदर्थं किशोरीमोहनद्विवेदि- पुण्डरीकाक्षमिश्रः- पीताम्वरपण्डा- नीलमणिदाशः- मिहिरपाणिग्राहि- उमाकान्तपण्डा- एते कविप्रवराः चिरस्मरणीयाः । एतेषु रमानाथमिश्रमहाभागाः स्वतन्त्रं स्थानमधिकुर्वन्ति ।

**कूट शब्दः** उत्कलप्रदेशस्य सारस्वतपीठं, संस्कृतसाहित्यस्य श्रीक्षेत्रं, प्राचीनकालादारभ्य

## कवेः परिचयः-

बालेश्वरमण्डलस्य “माणिखम्बः” इत्याख्ये जनपदे कविः रमानाथमिश्रः जन्मग्रहणमकरोत् । पण्डितरमानाथमिश्रशर्मा चतुरधिकोनविंशतिशततमसंवत्सरे जानुआरीमासस्य सप्तमतारिकायां(०७.०१.१९०४) जन्मग्रहणम् अकरोत् ।तस्य पिता यदुनाथमिश्रमहाभागा आसीत् । तस्य मातुः नामरासीत् स्वप्नावतीदेवी । बहवः घातप्रतिघातादनन्तरं रमानाथमिश्रः वरिष्ठनाट्यकाररूपेण उत्कलेषु प्रसिद्धः आसीत् ।

## कवेः कृतयः-

साहित्यसाधनाक्षेत्रे कवेः रमानाथमिश्रस्य महत्त्वपूर्णं योगदानमस्ति । कवेः मिश्रस्य बहुनि आधुनिककाव्यसंकलनानि भारतीयसाहित्यजगति विलसन्ति । तस्य काव्यग्रन्थानां परिचयः नीच्चैः प्रदीयते । तद्यथा-

संस्कृतभाषया तेन विरचिताः ग्रन्थाः- १.चाणक्यविजयनाटकम्, २.श्रीरामविजयनाटकम्, ३.कलिङ्गविजयनाटकम्, ४.समाधाननाटकम्, ५.प्रायश्चितनाटकम्, ६.वेणीसंहारनाटकम्, ७.हरिश्चन्द्रनाटकम्, ८.विचारनाटकम्, ९.गुरुदक्षिणानाटकम्, १०.त्रयी, ११.दामद्वयकाव्यम्, १२.महिमास्तवकाव्यम्, १३.अत्मबोधिनीकाव्यम्, १४.प्रणतिकाव्यम्, १५.पुरातनबालेश्वरकाव्यम् च ।

उत्कलभाषया विरचिताः ग्रन्थाः यथा- १.वाग्दत्ताउपन्यास, २.राणीदुर्गावतीउपन्यास, ३.एक अतीत स्मृतिउपन्यास, ४.भातृविवादउपन्यास ५. वाजिराउतकविता, ६.श्रीगान्धीकविता, ७.मातृशक्तिकविता, ८.मञ्चनाटकम् च ।
एतेषु कृतिमध्येषु संस्कृतभाषया विरचितं चाणक्यविजयनाटकं सर्वश्रेष्ठरूपेण परिगण्यते ।

## चाणक्यविजयनाटकस्य विषयवस्तुः-

पण्डितमिश्रः विविधाधुनिकदृष्टिकोणान् मनसि निधाय विशाखदत्तप्रणितं मुद्राराक्षसनाटकमाधारिकृत्यः १९५२खीष्टाब्दे चाणक्यविजयनाटकं विरचितवान् । नाटकमिदं पञ्चाङ्कविशिष्टं भवति । अत्र नायकः भवति चाणक्यः । चाणक्यविजयनाटकस्य प्रारम्भे चाणक्यः स्वस्य अपमाननिराकरणाय नन्दस्य विनाशाय प्रतिज्ञाबद्धः आसीत् । ततः परं द्वितीयोऽङ्के नन्दद्वारेण विताडितः चन्द्रगुप्तः चाणक्यस्य शिष्यत्वं गृह्णाति । तदनन्तरं चाणक्यस्य प्रतिज्ञा द्विगुणिता । केनापि रुपेण नन्दविनाशं कृत्वा चन्द्रगुप्तं राजपदेन संस्थाप्य, तथा चन्द्रगुप्तसाम्राज्ये अमात्यराक्षसस्य मन्त्रीत्वग्रहणमत्र तृतीये-चतुर्थे-पञ्चमोऽङ्के परिलक्ष्यते ।

**साहित्यदर्पणानुसारं पञ्चार्थप्रकृतय:[1]-**

प्रकृतयो हेतव: । अर्थप्रकृतय: प्रयोजनसिद्धिहेतव: । प्रक्रियन्ते प्रयोजनं साध्यन्ते यथा चेति । तथा च बीजं, बिन्दु:, पताका, प्रकरी, कार्यञ्च, एता: पञ्च अर्थस्य प्रयोजनस्य वा प्रकृतय: सिद्धकारणानि ।

साहित्यदर्पणकारस्य विश्वनाथकविराजस्य मतानुसारं पञ्च-अर्थप्रकृतय: यथा-

बीजं बिन्दु: पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतय: पञ्च ज्ञात्वा योज्या यथाविधि ।। सा.द.६-६४।।

**बीजम्-**

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ।। सा.द.६.६५।।

फलप्राप्तस्य करणीभूत: हेतु: भवति बीजम् । अयम् प्रारम्भे सूक्ष्मरूपं भवति । शनै: शनै: अग्रे अयं विकसितफलस्वरूपं प्राप्नोति । इयं भवति बीजम् ।

**बिन्दु:-**

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ।। सा.द.६-६६।।

यदि कुत्रचित् अवान्तरघटनया तत्र मूलकथा कथञ्चित् विच्छेदं प्राप्ते, पुन: यदि तदेव घटनावृतान्तम् अग्रे सारयितुं य: एव सहायं करोति स एव बिन्दु: ।

**पताका-**

व्यापि प्रासङ्गिकं वृतं पताकेत्यभिधीयते ।
पताकानायकस्य स्यान्न स्वकीयं फलान्तरम् ।। सा.द.६-६७।।

प्रासङ्गिकवृतान्ते य: पात्र: नायकस्य कार्यसिद्धिं यावत् सहायं करोति सा पताकानायकरूपेणैव अभिधीयते ।

**प्रकरी-**

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता ।
प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम् ।। सा.द.६-६८।।

प्रसङ्गवशत: नायकस्य एकस्य लघुप्रसङ्गेन यदि कार्यस्द्धियर्थं सम्भावना परिलक्ष्यते तत्र प्रकरी इति कथ्यते ।

**कार्यम्-**

अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धन: ।
समापनं तु यत्सिद्ध्यै तत्कर्यमिति संमतम् ।। सा.द.६-६९।।

यं प्रापयितुं नायक: आद्यन्तं यावत् तत्पर: भवति तत्तु कार्यं भवति । अपि च नाटकस्य अन्यपात्रविशेषा: कार्यसिद्धये नायकस्य सहायं कुर्वन्ति।

[1] . शास्त्री, कृष्णमोहन, साहित्यदर्पण:, चौखम्बा संस्कृत संस्थान, वाराणसी, २०१५

**चाणक्यविजयनाटके पञ्च-अर्थप्रकृतय: यथा-**

नाटके अर्थप्रकृतय: अपरिहार्या: । चाणक्यविजयनाटके अर्थप्रकृतय: एवंरूपेण परिलक्षिता: सन्ति ।

**बीजम्-** साहित्यदर्पणस्य लक्षणानुसारं फलप्राप्तस्य करणीभूत: हेतु: भवति बीज: । अपि च नायकस्य मुख्यफलप्राप्तस्य हेतुरेव बीज: इति मन्यते । चाणक्यविजयनाटके प्रथमाङ्कस्य अन्तिमे राज्ञा नन्देन चाणक्य: अपमानं बभूव । एवं द्वितीयोऽङ्के नन्दसाम्राज्यात् विताडित: चन्द्रगुप्त: चाणक्यस्य शिष्यत्वं ग्रहणं कृतम् । फलत: चाणक्य: प्रतिशोधेन नन्दस्य हत्या, चन्द्रगुप्तस्य राज्याभिषेक:, नन्दस्य अमात्यं राक्षसम् आनीय चन्द्रगुप्तस्य मन्त्रिपदे अभिषिक्तमत्रचाणक्यविजयनाटके नायकचाणक्यस्य प्रधानमुदेश्यमासीत् । अत: एतेषु क्षेत्रेषु बीज: परिलक्ष्यते ।

**बिन्दु:-** यदि कुत्रचित् अवान्तरघटनया मूलकथाया: तथा इतिवृतान्तस्य कथञ्चित् विच्छेदं प्राप्ते, पुन: तदेव घटनावृतान्तम् अग्रेसारयितुं केऽपि सहायतां करोति, ते बिन्दुरुपेण परिगण्यन्ते । चाणक्यविजयनाटकस्य तृतीयाङ्के चन्द्रगुप्तं हन्तुं राक्षस: एकं बिषकन्यां प्रेषितवान् । परन्तु चाणक्येन स्वस्य बुद्धिवलेन शकटारमाध्यमेन तद्विषकन्यां राजापर्वतेश्वरं प्रति प्रेषितम् । अनेनात्र मूलप्रसङ्गस्य विच्छेद: भवति । परन्तु तदनन्तरं राक्षसस्य मित्रचन्दनदासस्य गृहात् भिक्ष्युमाध्यमेन राक्षसस्य मुद्राप्राप्तिरेव नाटकं अग्रे सारयितुं सहायं करोति । अत्र बिन्दु: उपलक्ष्यते ।

**पताका-** प्रासङ्गिकवृतान्ते य: पात्र: नायकस्य कार्यसिद्धिं यावत् सहार्यं करोति, ते पताकानायकरुपेण परिगण्यन्ते । चाणक्यविजयनाटके शकटार: पताकानायकरुपेण स्वीक्रियते । कारणमित्युक्ते नाटकस्य प्रारम्भात् नन्दसाम्राज्यं प्रति चाणक्यस्य निमन्त्रिकरणं पुन: नन्देन चाणक्यस्य अपमानकरणं, पुन: नन्दसाम्राज्ये चन्द्रगुप्तस्य राजाकरणं एवं चन्द्रगुप्तस्य मन्त्रिपदे अमात्यराक्षसनियोजितम् इत्यादय: प्रधाननायकस्य चाणक्यस्य प्रधानोद्देश्यं भवति । एतेषु कार्येषु आदित: शेषं यावत् शकटार: चाणक्यस्य सहार्यं करोति । अत: अस्मिन् नाटके शकटार: पताकानायकरुपेण परिगण्यते ।

**प्रकरी-** प्रशङ्गवशत: नायकस्य स्वल्पसमयावकाशे य: कार्यसिद्धि: जायते सा प्रकरीत्युच्यते । चाणक्यविजयनाटके चतुर्थाङ्के राजा चन्द्रगुप्तस्य आदेशानुसारेण कौमुदीमहोत्सवपालनार्थं प्रजा: तत्परा: भवन्ति । तदा चाणक्य: तं महोत्सवं विरोधं कृत्वा स्थगितवान् । अनेन चन्द्रगुप्तचाणक्ययोर्मध्ये महोत्सवस्थगित: वार्त्तामुपरि कृतकलह: समजनि । कारणं चाणक्येन ज्ञायते एतेषां कलहं वार्त्तां श्रृत्वा राक्षस: सुनिश्चितरुपेण चन्द्रगुप्तचाणक्यर्मध्ये बिरोधभावं प्रकटयितुं प्रयत्नं कुर्यात् । इत्थमेव चन्द्रगुप्तस्य सुक्ष्मप्रचेष्टा प्रकरी नामेन अर्थप्रकृते: आभास: भवति । अयमेव वृतान्त: नायकस्य फलसिद्ध्यर्थं सहायं करोति ।

**कार्यम्-** नाटकेस्मिन् यं प्रापयितुं नायक: आद्यन्तं यावत् तत्पर: भवति अपि च नाटकस्य अन्यपात्रविशेषा अपि नायकस्य कार्यसिद्धये सहार्यं कुर्वन्ति, तत् कार्यमेव इत्युच्यते । चाणक्यविजयनाटके चाणक्यस्य अपमानफलस्वरुप: नन्दस्य हननं, चन्द्रगुप्तस्य राज्याभिषेक:, नन्दस्य अमात्यं राक्षसम् आनीय चन्द्रगुप्तस्य मन्त्रिपदे नियोजनं, नायक: चाणक्यस्य प्रधानोद्देश्यं भवति । इमानि सर्वाणि कार्यसिद्ध्यर्थं चाणक्य: विभिन्नं कूटनीतिं प्रयोगं कृतवान् । येन फलेन राक्षस: मित्रचन्दनदासस्य प्राणरक्षानिमित्तं चाणक्यपाश्वे आत्मसर्मपणं करोति । एवं रुपेण पञ्चमाङ्के कार्यसिद्धि: भवति । अत्र कार्यरुपकम् अर्थप्रकृति: दरिदृश्यते ।

**उपसंहार:-**

सुरभारत्या: संस्कृतसाहित्यवाङ्मये वैदिकयुगादारभ्य लौकिकयुगपर्यन्तं भारतवर्षस्य आदर्शात्मकं आत्मतत्त्वं अनुध्यायन्त: प्राचीनमनीषिण:

जीवनमूल्यबोधकान् ग्रन्थान् प्रणीय समग्रपृथिव्यां चिरनमस्या: सन्ति । एतेषु मुनय: रमानाथमिश्र: अन्यतम:। अत्र पण्डितमिश्र: मुद्राराक्षसनाटकम् आधारिकृत्य चाणक्यविजयनाटकम् विरचितम् । संस्कृतसाहित्यस्य विकाशसाधने बालेश्वरमण्डलस्य ये खलु कवय: नाट्यकारश्च सतत प्रयासरता:, तेषु रमानाथमिश्रमहोदया: तथा तेषां कृतय: भारतीयसाहित्यजगति विलसन्ति ।

**परामृष्टग्रन्था:**


१. दासगुप्त, दि हिष्टोरी अफ् सान्सक्रिट् लिटरेचर, कोलकता, १९६२ ।
२. मिश्र, रमानाथ, चाणक्यविजयम्, श्रीरामचन्द्र संस्कृत विद्यालय, बालेश्वर ।
३. शास्त्री, कृष्णमोहन, साहित्यदर्पण:, चौखम्बा संस्कृत संस्थान, वाराणसी, २०१५
४. रटारे, माधवजनार्दन, साहित्यदर्पण:, चौखम्भा संस्कृत संस्थान, वाराणासी, प्रथम संस्करण विं.स.२०६६, द्वितीय संस्करण-२००९ ।
५. रथ, सूर्यमणि, साहित्यदर्पण: सांविदीप्रकाशनम्, पुरी, २०१७ ।